# Hymn to River Manikarnika

# મણિકર્ણિકાષ્ટકમ્

## Document Information

Text title : maNikarNikaashhTakaM Hymn to River Manikarnika

File name : manikarnika8.itx

Category : aShTaka, devii, nadI, devI, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Transliterated by : Savithri D. savdev at hotmail.com

Proofread by : Savithri D. savdev at hotmail.com

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2023

*sanskritdocuments.org*

Hymn to River Manikarnika

# મણિકર્ણિકાષ્ટકમ્

ત્વત્તીરે મણિકર્ણિકે હરિહરૌ સાયુજ્યમુક્તિપ્રદૌ
વાદન્તૌ કુરુતઃ પરસ્પરમુભૌ જન્તોઃ પ્રયાણોત્સવે ।
મદ્રૂપો મનુજોઽયમસ્તુ હરિણા પ્રોક્તઃ શિવસ્તત્ક્ષણાત્
તન્મધ્યાદ્ભૃગુલાઞ્છનો ગરુડગઃ પીતામ્બરો નિર્ગતઃ ॥ ૧॥

ઇન્દ્રાદ્યાસ્ત્રિદશાઃ પતન્તિ નિયતં ભોગક્ષયે યે પુન
ર્જાયન્તે મનુજાસ્તતોઽપિ પશવઃ કીટાઃ પતઙ્ગાદયઃ ।
યે માતર્મણિકર્ણિકે તવ જલે મજ્જન્તિ નિષ્કલ્મષાઃ
સાયુજ્યેઽપિ કિરીટકૌસ્તુભધરા નારાયણાઃ સ્યુર્નરાઃ ॥ ૨॥

કાશી ધન્યતમા વિમુક્તનગરી સાલંકૃતા ગઙ્ગયા
તત્રેયં મણિકર્ણિકા સુખકરી મુક્તિર્હિ તત્કિંકરી ।
સ્વર્લોકસ્તુલિતઃ સહૈવ વિબુધૈઃ કાશ્યા સમં બ્રહ્મણા
કાશી ક્ષોણિતલે સ્થિતા ગુરુતરા સ્વર્ગો લઘુત્વં ગતઃ ॥ ૩॥

ગઙ્ગાતીરમનુત્તમં હિ સકલં તત્રાપિ કાશ્યુત્તમા
તસ્યાં સા મણિકર્ણિકોત્તમતમા યેત્રેશ્વરો મુક્તિદઃ ।
દેવાનામપિ દુર્લભં સ્થલમિદં પાપૌઘનાશક્ષમં
પૂર્વોપાર્જિતપુણ્યપુઞ્જગમકં પુણ્યૈર્જનૈઃ પ્રાપ્યતે ॥ ૪॥

દુઃખામ્ભોધિગતો હિ જન્તુનિવહસ્તેષાં કથં નિષ્કૃતિઃ
જ્ઞાત્વા તદ્ધિ વિરિઞ્ચિના વિરચિતા વારાણસી શર્મદા ।
લોકાઃસ્વર્ગસુખાસ્તતોઽપિ લઘવો ભોગાન્તપાતપ્રદાઃ
કાશી મુક્તિપુરી સદા શિવકરી ધર્માર્થમોક્ષપ્રદા ॥ ૫॥

એકો વેણુધરો ધરાધરધરઃ શ્રીવત્સભૂષાધરઃ
યોઽપ્યેકઃ કિલ શંકરો વિષધરો ગઙ્ગાધરો માધવઃ ।
યે માતર્મણિકર્ણિકે તવ જલે મજ્જન્તિ તે માનવાઃ
રુદ્રા વા હરયો ભવન્તિ બહવસ્તેષાં બહુત્વં કથમ્ ॥ ૬॥

ત્વત્તીરે મરણં તુ મઙ્ગલકરં દેવૈરપિ શ્લાઘ્યતે
શક્રસ્તં મનુજં સહસ્રનયનૈર્દ્રષ્ટું સદા તત્પરઃ ।
આયાન્તં સવિતા સહસ્રકિરણૈઃ પ્રત્યુગ્દતોઽભૂત્સદા
પુણ્યોઽસૌ વૃષગોઽથવા ગરુડગઃ કિં મન્દિરં યાસ્યતિ ॥ ૭॥

મધ્યાહ્ને મણિકર્ણિકાસ્નપનજં પુણ્યં ન વક્તું ક્ષમઃ
સ્વીયૈરબ્ધશતૈશ્ચતુર્મુખધરો વેદાર્થદીક્ષાગુરુઃ ।
યોગાભ્યાસબલેન ચન્દ્રશિખરસ્તત્પુણ્યપારંગતઃ
ત્વત્તીરે પ્રકરોતિ સુપ્તપુરુષં નારાયણં વા શિવમ્ ॥ ૮॥

કૃચ્છ્રૈર્કોટિશતૈઃ સ્વપાપનિધનં યચ્ચાશ્વમેધૈઃ ફલં
તત્સર્વે મણિકર્ણિકાસ્નપનજે પુણ્યે પ્રવિષ્ટં ભવેત્ ।
સ્નાત્વા સ્તોત્રમિદં નરઃ પઠતિ ચેત્સંસારપાથોનિધિં
તીર્ત્વા પલ્વલવત્પ્રયાતિ સદનં તેજોમયં બ્રહ્મણઃ ॥ ૯॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
મણિકર્ણિકાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded by Savithri D savdev at hotmail.com

---

*Hymn to River Manikarnika*

pdf was typeset on August 14, 2023

Please send corrections to *sanskrit@cheerful.com*